# PREFACE.

So conservative and narrow we have been in our study of Sanskrit Kavyas that our choice is limited down to about a dozen principal kavyas and the result is that other kavyas even of the highest merit are allowed to fade out of the picture. Specially towards the rich treasure of Pali and Prakrit literature our attitude has been that of a culpable apathy. But for the devoted labours of the Western Savants, the literary gems of Pali and Prakrit should have been lost to the world beyond recovery. It is high time that we should turn to this neglected branch of our literature. I therefore heartily appreciate the efforts of Pt. Mathura Nath Shastri who first brought out a good edition of the *Gathasaptashati* the great Prakrit anthology of Hala with a Sanskrit rendering in metrical form of the original Prakrit verses and a new commentary on the same by himself.

Now for the benefit of our University and college Students he has just taken out a selection of 133 stanzas from the *Gathasaptashati*. I am sure that it will fulfil a very useful purpose and meet a longfelt demand. A word of apology however may not be out of place here to justify the principal position given to sanskrit rendering of the gathas which in their original prakrit form appear only in foot notes. To anyone who is acquainted with the condition of our University Students, the practicability of this arrangement will atonce be evident. The study of Pali & Prakrit has no place in our University courses of studies or if it has in some cases as an optional subject, it only serves a decorative purpose for the University Calendar. As it is the interest in Pali and Prakrit literature can be created through Sanskrit link only and hence the importance of Sanskrit rendering.

the study of Sanskrit & Prakrit in form of Sanskrit rendering of the *Gathasaptashati* and the present selection from the same, and hope that both of these will fulfil their object.


*Meerut*
*17 Oct 1935*

**Dharmendra Nath Shastri**
*Professor Meerut College*
*Convener Sanskrit Board of*
**Studies, Agra University**




---

* गृहिण्या महानसकर्ममसीमलिनितेन हस्तेन ।
स्पृष्टं मुखमुपहसति हि चन्द्रावस्थां गतं दयितः ॥

# FOREWORD

TO

The main Edition

—:—

The following pages embody the text of 'Sanskrit Gatha Saptashati with a new commentary entitled Vyangya Sarvankasha in Sanskrit by Bhatta Mathura Nath Shastri of Jaipur The text of the work is a free Sanskrit rendering in metrical form of the original Prakrit verses attributed to the great royal poet Hala or Satvahana of the Andhra dynasty The present edition comprises the Prakrit Gathas of Hala a literal Sanskrit translation a free metrical version in Sanskrit and a new Sanskrit commentary

The GathaSaptashati is an anthology in Maharashtri Prakrit of above 700 erotic verses in the Arya metre and occupies a unique place as a lyrical poem in the History of Sanskrit Poetry The compilation was made by King Hala and contains a number of verses of his own but the greater portion of the work represents the l bour of other lyrical poets of the age th n m s u some having been mentioned ( with doubtful ac ura y in se r l cases ) in sub qu nt o 1 1 nt n Al ost ll the v rses howev r ar ja ily t p ac ful f esh and vivid

The popularity of the work may be inferred from the fact of its having been widely commented upon So far as our present knowledge goes there were no less than eighteen commentaries on the work some of which were really good and useful *The present commentary by Pandit Mathura Nath* is an addition to this number but a wel come addit ion Coming from the pen of a scholar who is himself a poe of great eminence it is naturally free as much from the rigidity as from the looseness and slip shod character which we have come to associate with the ordinary commentaries on poetical works in Sanskrit Written in an elegant and flowing styel it has tried to keep in view when interpreting the text, the requirements of artistic and asthetical sense *And it may be hoped that this will be* found to be greatly helpful in the appreciation of the poetical flavour of the original verses

Gov rnment Sanskrit Coll ,- BLNAPES } Sd GOPI NATH KAVIRAJ


*Principal*

॥ श्री ॥

# प्राक्कथनम्


हालोपनामकसातवाहनसङ्कलिता गाथासप्तशती भारतीयसाहित्ये प्रधानं स्थानमधिकरोति। न केवलं प्राकृत-काव्येष्वेव, विबुधविश्रुतेषु संस्कृत काव्येष्वपि एतत्तुलनाया काव्यं गाथायापि कर्नचिदधिगतम्। इयं हि सप्तशती 'मुक्तक' पद्यानां संग्रहः। *मुक्तकं हि तद् भवति यदि पूर्वापर कथासम्बन्धं विनापि स्वतन्त्रतया पाठकानां मनसि रसं सञ्चारयितुं भवेत् समर्थम्। पूर्वापरसम्बन्धं विना केवलमेकमात्रं पद्यं सदैव चित्ताकर्षकं भवन् यत्न हि तत् सर्वात्मना विशेषेण रसनिर्भरं च भवेत्। प्रबन्धकाव्येषु ( काव्य नाटकादिकाव्येषु ) रोचकतमस्य कथानकस्य नैपुण्येन निर्वाहे कृते पाठकस्य मानसं कथारसनिमीलितया सामान्येऽपि पद्ये गुणदोषादि विचारविषये प्रायः शिथिलमेव भवति। तत्र हि पूर्वापरसम्बद्धा कथैव तथा वशीकारिणी भवति यथा कथोत्तरघटनाऽऽस्वादाय उत्कण्ठितचेतसा पद्यानां गुणदोषाभिविचारं परित्यज्य आगामिकथाऽवगमार्थमेवाऽग्रेसरं भवति। मुक्तकानि तु प्रत्येकपद्यान्येव स्वतन्त्राणि भवन्तीति स्वरूपेणैव आलुप पाठकानां मनस्यन्नेव साभिनिवेशा भवन्ते, न तत्र कथा सहायिका भवति। अत एव मुक्तककाव्यं यावत्किञ्च व्यङ्ग्यार्थचमत्कार पूर्णं गुणनिर्भरं लघुस्वरूपं च न भवति न तावत्तत्र सफलता प्राप्यते कविना। आचार्यैश्च साहसोत्तरम्– य महाकविप्रवरा एवंविध रचनाभिरेव भवन्तीति।

* 'पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम्।' ध्वन्यालोकलोचनम्।




गाथासप्तशतीं विहाय संस्कृतभाषायां यानि किल प्राचीनानि मुक्तककाव्यानि प्रसिद्धानि तेषु हि अमरुकशतकम् आर्यासप्तशती चैव सुप्रसिद्धे । अमरुकशतकं हि अमरुकनाम्नो नृपस्य कस्यचिद्राज्ञः शरीरे परकायप्रवेशविधया प्रविश्य भगवता शङ्कराचार्येण निर्मितमिति पण्डित समाजे प्रसिद्धम् । उक्तं चापि अमरुकशतकटीकाकारेण देवयक्षरेण—' क मे मन्दा बुद्धिः क च रसमयं शङ्करवचः ' ।

भगवतः शङ्कराचार्यस्योद्भवसमयः ८४५ समो विक्रमसंवत्सर इति यज्ञेश्वरपण्डितेन ' आर्यविद्यासुधाकरे ' साधितम् । कथं चेन्मते तु शङ्कराचार्यस्य समयः ख्रिष्टस्य सप्तमी शताब्दी । यत्किञ्चिदस्तु-अयं गाथानिर्मातुः शकप्रवर्तकात् शालिवाहनान्न स प्राचीन इति तु निर्विवादम् । एतन्निर्मितममरुशतकं संस्कृतसाहित्ये मन्दं गौरवमधिगच्छति । अमरुकतुलनायां कश्चिदन्यो मुक्तकनिर्माता नासीत्तस्मिन् समये इति बभूव प्रसिद्धं सहृदयगोष्ठ्याम् । अस्य हि एककं पद्यं शतप्रबन्धकाव्येभ्योऽप्यधिकमभिमन्यते स्म सहृदयैः । अत एव हि चिरन्तनी प्रसिद्धिः अमरुककवेरेकः श्लोकः प्रबन्धशतायते । ध्वनिस्थापकः श्रीमान् आनन्दवर्धनाचार्योऽपि अमरुककवेरेव मुक्तकपद्यानि सर्वोत्तमानि परिगणयामास । एतानि हि मुक्तकानि शृङ्गाररसस्य भावस्य चोदाहरणतया सर्वत्रैव साहित्ये सुप्रसिद्धानि । एवं किल अमरुको मुक्तककाव्यविषये सर्वनिमुक्त स्थानं प्राप्याऽपि गाथासप्तशत्याः समीपे ऋणी सम्पद्यते । यतो हि स्थाने स्थाने अमरुकेण गाथानामर्थं अविकलमुपजीवितम् । ये किल महोदया एतद् द्रष्टुमिच्छन्ति ते मत्सम्पादित संस्कृतगाथासप्तशत्याः भूमिकायां सोदाहरणं सप्रमाणं चैव द्रष्टुं शक्नुयुः । विस्तरभयान्नात्र तदुद्धारः क्रियते ।




द्वितीयं लावण्यपूर्णकाव्यम् आर्यासप्तशती । अस्याः निर्माता बङ्गदेशीयः श्रीगोवर्द्धनाचार्यः । अस्य हि प्रतिज्ञा आर्येतरविषम् [illegible] [illegible] । अत्रे हि शृङ्गाररसवर्णनमायामद्वितीय [illegible] [illegible] [illegible]गोविन्दकथा अयदेव [illegible]— शृङ्गारोत्तर[illegible] [illegible] आपि न [illegible] । [illegible] गोवर्द्धनाचार्य[illegible] [illegible] । अयं स्वमुखेन [illegible]

'मसृणपदरीतिगतय सज्जनहृदयाभिसारिका सुरसा ।
मदनाद्वयापनिषदो विशदा गोवर्द्धनस्यार्या ॥'
'कवितमरसिंहनादः स्वरानुवादः सुधैकसंवादः ।
विद्वद्विनोदकन्दः सन्दर्भोऽयं मया सृष्टः ॥'

[illegible] आर्यासप्तशती [illegible] तु [illegible] । [illegible] ( [illegible] ) [illegible] ( [illegible] ) [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible]

# विहारीसतसई

संस्कृतकाव्याम्बुराशीय परस्तान्निर्मितं व्रजभाषामयं मुक्तककाव्यं 'विहारीसतसई'। एतस्याः सप्तशत्याः हिन्दीसंसारे कीदृशी प्रतिष्ठेति अस्मिन् समये शिक्षितमहोदयेभ्यः कथनस्यानावश्यकता। सर्वत्रापि साहित्ये सेयं साम्यरूपेण परिगणिता। प्रसिद्धं पण्डितैरेतस्याः उपरि बहुसंख्यका टीका निर्मिता। नानाविधविविधाभिर्व्याख्याभिः नानाविधैर्मर्मज्ञैरस्याः प्रकाशिता। हिन्दीसाहित्यमहारथिभिः सेयम् 'अमरकामधेनु' इत्याख्यायते। एकैकमस्याः पद्यं शर इव सहृदयानां हृदये घातमिव दधाति। तेन हि स्वत एव मस्तकमाकम्पते।

वर्तमानयुगे शृङ्गारमयानि काव्यानि हेयदृष्ट्या वीक्ष्यन्ते शिक्षितमहोदयैः। परमस्मिन्नेव युगे सेयं सप्तशती सहृदयानां तथा प्रीतिपात्रं बभूव यथा बहूनि वर्षाणि यावदस्याः एकैकपद्यस्यालोचना प्रसिद्धप्रसिद्धमासिकपत्रेषु प्रकाशिताऽभवत्। किं बहुना-अस्याः कतिचित्पद्यानामेव टीकां विलिख्य स्वर्गीय पं० श्रीपद्मसिंहमहोदयः सुमतिमण्डितः 'मङ्गलाप्रसादपारितोषिकं' प्राप। अस्मिन्किल सेयं सप्तशती हिन्दीसाहित्यस्य उच्चतमपरीक्षासु पाठ्यत्वेन नियता। अस्तु व्रजभाषासाहित्यस्य सर्वस्वभूता सेयं सप्तशत्यपि प्रधानतया गाथासप्तशतीमालम्ब्यैव लोकानां हृदयान्यावर्जयामास। यत्र यत्र अलौकिकचमत्कारकारिणी काचिद्रचना दृष्टिपथे आगच्छेत् सूक्ष्ममवधाने दत्ते तत्र तत्रैव गाथासप्तशत्याः कल्पस्तत्र सुस्पष्टमवभासितो × भवेत्। प्रसिद्धमस्ति सहृदयसमाजे यद् विहारिसतशत्याः –

---

* 'सतसैया को दोहरा ज्यों नावक को तीर'।

× ये महोदया विहारिकाव्ये गाथार्थोपजीवनं द्वयोः सप्तशत्योस्तुलनां च द्रष्टुमिच्छन्ति तैर्मन्निर्मिता स० गाथासप्तशती तद्भूमिका च द्रष्टव्या।

"नहिं पराग नहिं मधुर रस नहिं विकास इहिं काल।
अली कली ही सों बँध्यो आगें कौन हवाल ॥"

इत्येकमात्रमेव पद्यं महाप्रभावशालिनम् आम्बेरधराधीश्वर श्रीमन्त जयसिंहमहाराजाधिराजमप्यनुरागाबद्धमाकरोत् । एकमात्रेणानेन पद्येन पुनरस्य श्रीमानम्बरधरणीपुरन्दरो बिहारिणे प्रभूतं पारितोषिकमयच्छत् सतसईनिर्माणाय चात्यादृतोऽधिकार । एतद्धि पद्यं सप्तशत्यामपि बिहारीसतसर्यां शीर्षस्थानीयं परिगण्यते । इत्थं तदिदमपि पद्यं गाथासप्तशत्यरसपानानुभवीव बिहारिणा निर्मितमिति स्पष्टं हिन्दी महारथिन एव स्वीकुर्वन्ति । सार्धं किञ्च प० पद्मसिंहमहाशयेन यत्—

'ईषत्तापविकासं यावन्नाप्नोति मालतीकलिका ।
मकरन्दपानलोलुप मधुकर किं तावदेव मर्दयसि ॥'

( जाव ण कोसविकासं पावइ ईसीस मालईकलिआ ।
मअरन्दपाणलोहिल्ल भमर तावच्चिअ मलेसि ॥ ५।४४)

इति गाथाश्लेषेण पूर्वोक्तं दोहापद्यं निर्मितमिति ।

## गाथासप्तशती

एवं किञ्च सर्वं स्पष्टार्थी सर्वेषामपि मुक्तककाव्यानामादिभूता उपजीव्या च सिद्ध्यति । महाकविना [illegible] कण्ठाभरणे प्रोक्तम्—

' छायोपजीवी पदकोपजीवी पादोपजीवी सकलोपजीवी ।
भवेदथ प्राप्तकवित्वजीवी स्वोन्मेषतो वा भुवनोपजीव्य. ।

तत्र भुवनोपजीव्यो भगवान् व्यासो निर्दिष्टस्तेन । ततश्च भुरक काव्यानामपि सेयं सप्तशत्येव सर्वोपजीव्येति स्वीकर्तव्यमेव भवेत् ।

इयं हि सप्तशती प्राकृतभाषायाश्चरमोत्कर्षकाले निर्मिताऽभवदिति सहृदयानां प्रत्यक्ष स्यात् । यतो हि सपत पुरातनी सेयं संस्कृतभाषा साहित्यविषये शनैः शनैस्तामनुसृत्य प्राय यथाऽस्यास्तुलनायां भ कापि भूमण्डलस्य भाषा (मध्ययुगे) स्थातुमशक्नुत् । ततया माधुर्य च गौरव च साहित्यवैपुल्य च सौष्ठव च सर्वैरेव मार्मिकैस्तस्मिन् समये स्वीकृतमासीत् । तत्रैव जनया सह केवल साधारणलोकानां व्यवहार मात्रसाधिकाया प्राकृतभाषाया का नाम तुलनाकथा समभवेत् ? किन्तु विशिष्ट नियमानुसार यस्मिन् समये प्राकृतभाषा व्यवहारभाषात्व विहाय शनैः शनैः साहित्यसिंहासनमध्यारूढा, सहृदयश्रुतिप्रियानां महाक वीनां चादरभूमिरभूत् तस्मिन्नेव समये सेयं प्राकृतभाषा संस्कृतभाषाया स्पर्धाय पदमग्रे व्यधात् । सर्वैव किम् बहुभि कविभिस्तु तस्मिन् समये प्रमाणमपि प्राप्त यत् साहित्यविषये यथा प्राकृतभाषा मधुरा न तथा संस्कृत मिति । प्राकृतभाषावनितानामवर कवीनां सेयं समनिश्चयद्रूपम् नासित । यः किञ्च संस्कृतभाषायाः किन्तु गूढम्या समभ्यस्ते इत्येतदपि प्राकृ प्रमाणानामनुगम्यमाना नावरिष्ट एव । यायावरमुद्भूय राजशेखरमहाकवि का वा संस्कृत्या न जनीयान यस्य हि काव्यमीमांसाप्रमीति हृदयकाव्यानि कारयमीनानि निपुण चाहि व्याकरण । सर्वाणि मार्मिकान् वशीकरोति । स्वकाव्यसदृशा मार्मिका यदि संस्कृतानुचनायां प्राकृत प्रशंसति ।
यदा –

* 'परुसा सक्कअबन्धा पाउअबन्धो वि होइ सुउमारो ।
पुरुसमहिलाणं जेत्तिअमिहन्तरं तेत्तिअमिमाणम् ॥ '

( कर्पूरमञ्जरी )

× ' ललिए महुरक्खरए जुवइजणवल्लहे ससिंगारे ।
सन्ते पाइअकव्वे को सक्कइ सक्कअं पढिउम् ॥ '

( वज्जालग्ग )

प्रमस्येदृशस्यैव कारणात् प्राकृतभाषायां गाथासप्तशतीप्रभृतीनाम् मुक्तककाव्यानां सृष्टिरासीत् । अस्याः सप्तशत्याः सप्तशतमितेष्वपि पद्येषु एकमपि पद्यं तादृशं नास्ति यद्धि कस्मिंश्चिदपि चमत्कारेण विरहितं भवेत्। प्रथमकस्य ( ध्वनि ) व्यङ्ग्यार्थस्य प्राचुर्यं दृश्यते। यदि पुनः प्राकृतभाषायाः कृते यशोऽर्जनसमयमासीत्तस्मिन् समये तु संस्कृतभाषायाः परमोत्कर्षो भवदेव यः यस्मिन् काले च प्राकृतभाषा तिरस्कृताऽभूत् संस्कृतस्य च पुनरपि पूर्ववत् प्रतिष्ठितकम् प्रावर्तत तस्मिन्नपि समये प्राकृतभाषायाः प्रभावः पूर्ववदेव संस्कृतस्योपरि ज्ञातुमधिकारः। अत्र एव हि संस्कृतभाषायाः पाठकानां कृते—आनन्दवर्धनाभिनव-मम्मटरुद्रट-विश्वनाथप्रभृतिभिः स्वस्वसाहित्यनिबन्धेषु सर्व सप्तशती गाथाः समुद्धृताः। कर्पूरमञ्जर्यादिभिः स्वग्रन्थेषु सर्व सप्तशती सुबहु प्रशंसिता। अत्र वदन्ति यथा —

---

* परुषाः संस्कृतबन्धाः प्राकृतबन्धोऽपि भवति सुकुमारः ।
पुरुषमहिलानां यावदिहान्तरं तावदेतयोः ॥

× ललिते मधुराक्षरे युवतिजनवल्लभे सशृङ्गारे ।
सति प्राकृतकाव्ये कः शक्नोति संस्कृतं पठितुम् ॥

* 'परुसा सक्कअबन्धा पाउअबन्धो वि होइ सुउमारो ।
पुरुसमहिलाणँ जेत्तिअमिहन्तर तेत्तियमिमाणम् ॥ '

( कर्पूरमञ्जरी )

× 'ललिए महुरक्खरए जुवइजणवल्लहे ससिंगारे ।
सन्ते पाइअकव्वे को सक्कइ सक्कअ पढिउम् ॥ '

( वज्जालग्ग )

एतस्मादेव कारणात् प्राकृतभाषायां गाथासप्तशतीमहत्तानाम् सुरमकाव्यानां सृष्टिरासीत् । यस्याः सप्तशत्याः सप्तशतसंख्याकेषु पद्येषु एकमपि पद्य तादृशं नास्ति यदि कस्मिन्नपि चमत्कारस्य विरहितं भवेत् । प्रत्येकपद्य ( ध्वनि ) व्यङ्ग्यार्थेन मधुरं द्योतति । यदि पुनः प्राकृतभाषायां कृतं धर्मोत्कर्षमयमासीत्तस्मिन् समये तु तस्याः सप्तशत्याः प्रसादो भवेदपि परं तस्मिन् काले न कृतमस्याः निरुद्धोऽभूत् । स्तूसाम्राज्य च पुनरपि पूर्ववत् निष्कण्टकम् प्रावर्तत तस्मिन्नपि समये सप्तशत्याः अस्याः प्रभावं पूर्वरूपस्य सहृदयानां मानसमर्थयत्कर । अत एव हि संस्कृतभाषायाः धुरन्धरैरपि— आनन्दवर्धनाचार्य-मम्मटभट्ट-विश्वनाथप्रभृतिभिः स्वस्वसाहित्यनिबन्धेषु सव सप्तशत्याः गाथाः समुद्धृताः । बाणराजशेखरादिभिः स्वग्रन्थेषु मम सप्तशती सुष्ठु प्रशंसिता । अत हर्षचरिते बाणः —

---

* परुषा संस्कृतबन्धाः प्राकृतबन्धोऽपि भवति सुकुमारः ।
पुरुषमहिलानां यावदिहान्तरं तावदनयोः ॥

× ललिते मधुराक्षरे युवतिजनवल्लभे सशृङ्गारे ।
सति प्राकृतकाव्ये कः शक्नोति संस्कृतं पठितुम् ॥

' भनिनामिनमग्राम्यमकरोत्सातवाहनः ।
विशुद्धजातिभिः कोषं रत्नैरिव सुभाषितैः ॥ '

भोजेन तु सरस्वतीकण्ठाभरणे प्रसङ्गानुसारं प्रायः सेयं गाथा सप्तशती समुद्धृता । यत्र हि हेतुरस्या सप्तशत्याः गुणगणा एव । तत्रोऽपि यानि सप्तशतं सप्तशतगाथाकानि पद्यानि उपभाषणानीति निर्वर्ण्य इव सप्तशती सकलेऽपि भारते सुप्रसिद्धा + ।



## सातवाहनः

अस्याः सप्तशत्या निर्माता नैकः कविः । सातवाहनस्य येन किल तस्मिन् समये सुप्रसिद्धा प्राकृतकवय आसन् तेषां सर्वेषामेव स्वपद्यानि स्वयम् । किन्तु यस्य शालिवाहनस्य नाम्ना सेयं सप्तशती प्रसिद्धा स हि एतस्याः केवलं सामग्र्याः सङ्कलनकर्ता । एतत् सप्तशत्याः प्रत्येकशतकस्यान्ते लिखितम् - 'कविवत्सलहालविरचिते ।

कविवत्सलः हाल-सात-शालिवाहन इत्याद्युपनामकः सातवाहनः भूपतिः दक्षिणप्रदेशे प्रतिष्ठान नगरस्याधिपतिरभूत्, यदि 'मान्यः' नाम्ना चिह्नमूलेन परिचीयते । अस्यैव सभायां बृहत्कथानिर्माता गुणाढ्यः कातन्त्रव्याकरणनिर्माता शर्ववर्मा इत्यादयो महाविद्वांस समभवन् । अयं हि प्राकृतकवीनां कृते कल्पतरुरिव समभूत् । विक्रमा

---

+ ' सत्त सताइं कइवच्छलेण कोडीअ मज्झआरम्मि ।
हालेण विरइआइं सालंकाराण गाहाणम् ॥ ३ ॥ '

त्येन यथा संस्कृतकस्य सनादरता तथा अनेन प्राकृतकवीनां समादर
स्ता प्राकृतभाषाया सर्वत्र प्रचार कृत । यथा सुप्रसिद्धमिदं प्राक्
रस्वतीकण्ठाभरणे—

'के नासन्नाढ्यराजस्य राज्ये प्राकृतभाषिणः ।
काले श्रीसाहसाङ्कस्य के न संस्कृतभाषिणः ॥'

यादवराज शालिवाहन । साहसाङ्को विक्रमादित्य ' इति टीकाकारो
निधापितः ।

महाप्रभावशालिना प्राकृतमितकस्य यस्य समाप्तौ च ये कवय
रस्वराज्ञस्तया तत्कृता समभवन् तेषां सर्वेषामेव काव्यस्येतत्र कृत्या
तो मध्यतः इदं सप्तशती सगृहीतापि स्पष्टं प्रतिभाति। अन्यथा सकल
न्यापि हस्य सातवाहनो नासि। यतो यस्यां सप्तशत्यां सातवाहनस्य
श्चिन्नमस्य नृपस्यापरि गाथानि पद्यान्युपलभ्यन्ते । नहि कीदृशोपि कोपि
ातुर पुरुष स्वकृतस्यैव स्वमूनामभेवरूपेण निबध्नीयात् । तर्हि तानि
ात्मन्दनो तस्यौ राजा स्वगुणेन स्वनाम्ना गाथेमिति को वा सावधान
श्रीनिदत ?

' आपन्नानि कुलानि द्वावेव इह विन्दन्ति नतम् ।
गौर्याश्च हरपादिताश्च नाभिरथनन्दन ॥ -।६७ ॥

[illegible] ति [illegible]
यदि यत [illegible] पुस्तक [illegible]
रस्य पाठः । इति । तत्र—[illegible]
[illegible]

यते । सङ्कलनकर्ता अथ कविश्च कदाचित् श्रीपालितनामा भवेदिति बहूनामनुमानम् । यतो हि अभिनन्दकृते रामचरितमहाकाव्ये—' हाले नोत्तमपूजया कविवृष श्रीपालितो लालित ' इत्याद्युपलभ्यते ।

इयं सप्तशती सातवाहनस्य यौवनकाले सङ्कलितेत्यपि लिख्यन्ति । यतो ह्यस्यां प्राधान्येन शृङ्गाररस एव सर्वत्र परिलक्ष्यते । यद्यपि तस्मिन् समये साहित्यसेवकानां रुचिरेव तादृशी बभूव परं यादृशशृङ्गारवर्णनम् अत्रोपलभ्यते तादृशं हि यौवनकाले एव कश्चिदभिरोचयेत्, नाऽन्यकाले । अस्यां यद्यपि प्राधान्येन शृङ्गाररसमयकाव्यान्येव सन्ति तथापि नीत्युपदेशाः, प्राकृतिकवर्णनानि, आचारसूचिका अन्या अपि सरससूक्तयो बहुशः प्राप्यन्ते । एतस्मादेव कारणात् एषा सप्तशती न केवलं प्राकृतसाहित्ये एव अपि तु संस्कृतसाहित्येऽपि सुस्थिरं सम्मानं लेभे ।

## गाथारत्नसमुच्चयः

किन्तु या गाथासप्तशती पूर्वोक्तया रीत्या पाश्चात्यप्राच्यमनीषिणां गुणश्लाघ्या, सा संस्कृतकाव्यविद्भिः अत्यन्तादरभावेन परिगृहीतापि बहूनाम् अप्रचलिता । मम दृष्ट्या तु एतस्येदमेव कारणं यत् इयं सप्तशती प्राकृतभाषायामस्ति । प्राकृतभाषा च सांप्रतमप्रचलितत्वात् दुर्बोधा निरवगाहा च । संस्कृते तु याऽस्याश्छाया ( अनुवाद ) भवति सा तु न सरसा । अत एव एतस्यां मनोयोगोऽपि न भवति । विशेषतश्च सेयं रससरणी शृङ्गारमयी । अत एव पाठ्यकोटौ इमां स्थापयितुं न प्रभवन्ति शिक्षाधिकारिणः । किन्तु अस्यां सप्तशत्याम् प्राकृतिकवर्णनानां नीतेश्चापि वर्णनं सुबहुलतमं बहुशोपलभ्यते । घोरं शृङ्गारं परित्यज्य अस्या

सप्तशत्या यद्विधा गाथा समुद्धृत्य चेदयं सज्जन प्रकाशयेत तर्हि संस्कृताभ्यासिनामुपयुक्तं स्यादित्यभून्मे विचार ।

अस्या सप्तशत्या मयैव संस्कृतपद्यानुवाद" संस्कृतगाथासप्तशती नाम्ना निर्णयसागरयन्त्रालये साम्प्रतमेव प्रकाशित येन सह पद्यार्थसमर्पकरा मार्मिका मञ्जिमालता नवीना टीकापि मुद्रिताऽस्ति । एतस्य ग्रन्थस्य प्रथमपरिचयम् ( Foreword ) गवर्नमेन्टसंस्कृतकालेजाध्यक्ष प्राच्यविद्यापारगमिभि श्रीमद्गोपीनाथकविराजमहोदयैर्लिखितम् । गाथासप्तशत्या हालस्य च विषये बहुतरं परिज्ञानं सर्वाणि इत्या तद्भूमिकायामेव प्रकाश्यते ।

वसन्तपञ्चमी १९९१वि० | भट्टश्रीमथुरानाथशास्त्री
जयपुरराजकीयसंस्कृतकालेजसाहित्यप्रधानाध्यापक

॥ श्री ॥

# गाथारत्नसमुच्चयः

## [ १ ]

प्रमथपते रोषारुणगौरीमुखचन्द्रसंचरत्प्रतिमम् ।
कल्पिताऽर्घसरसिरुहमिव सन्ध्यासलिलाञ्जलिं नमत ॥१॥

सन्ध्या तथा प्रणयिजनयापोऽप्ययं प्राणेश मां विहाय कथमन्यां ध्यायतीति रोषेण अरुणं यत् गौरीमुखं तदेव चन्द्रः तस्य संचरन्ती संक्रामन्ती प्रतिमा प्रतिबिम्बो यत्र । अत एव कल्पितार्घसरसिरुहमिव रोषमुखप्रतिबिम्बव्याजेन गृहीतार्घकमलमिव प्रमथपतेः शिवस्य सन्ध्याकालिकं सलिलाञ्जलिं यूयं नमत ॥ भगवन्तं शिवं प्रातः सन्ध्योपासनं दृष्ट्वा गौरी मनसि सदहत् आशा यदयं मां विहाय अन्यां स्त्रियं ध्यायति । अत एव कोपेन तस्या मुखमरुणमभवत् । तन्मुखस्य च प्रतिच्छाया शिवस्य अर्घाञ्जलौ प्रतिबिम्बिता । तया च तोये सलिलाञ्जलिना प्रतीतोऽभवत् यथा अर्घाञ्जलौ रक्तकमलं विन्यस्तं भवेत् । सूर्याय अर्घप्रदानसमये जलाञ्जलौ पुष्पं विन्यस्यत इति सदाचारः । तदत्र-एतादृशं भगवतः शिवस्य सन्ध्यासलिलाञ्जलिं नमत ।

---

## प्राकृतगाथा '

पसुवइणो रोसारुणपडिमासंकन्तगोरिमुहअन्दम् ।
गहिअग्घपङ्कअं विअ संझासलिलाञ्जलिं णमह ॥ १ ॥
( पशुपते रोषारुणप्रतिमासंक्रान्तगौरीमुखचन्द्रम् ।
गृहीतार्घपङ्कजमिव सन्ध्यासलिलाञ्जलिं नमत ॥ )

[illegible]

[illegible]

[illegible] ॥ २॥

[illegible]

[illegible]

[illegible] ॥ 3 ॥

[illegible]

---

[illegible]

[illegible] ॥

( [illegible]

[illegible] )

स्वपदिशा । प्रसमयूरसमूहा निःस्पृहिं निभर सुखा श्वराय माना । गिरिमध्यीपरया माना वर्षासमये रमिकानां द्विगुणमुन्म वर्द्धयन्तीत्यर्थः ।

स्वरमारतगन्धहस्तिनगिरिकूटाऽऽपतनभिन्नदेहस्य ।
धाराजलदस्य पश्यत जीव इव हि घुरुधुकायते विद्युत् ॥४॥

खरमारुतेन प्रचण्डपवनेन वेगात् गन्धहस्तिना ( गन्धहस्ति प्रमाण श्रेणि ) । अतएव गिरिकूटात् गिरिशृङ्गात् आपतनेन भिन्नदेहस्य विदीर्णशरीरस्य । धाराजलदस्य श्यामसमेयस्य जीव इव जीवितमिव ( प्राणा इव ) विद्युत् घुरुघुरायते घुरघुरशब्दमुत्पाद्य कम्पते इत्यर्थः । धाराजलदस्य प्राणापीन्सय विदीर्णशरीरस्य अतएव यथा हृदय कम्पते तथाऽत्र विद्युत्कम्प इत्याशयः ।

---

पशुल्लपल्लवलम्बा सिद्धोपसिलाजला सुरभमोरा ।
पसरियसमरद्दला जोगाहन्तो गिरिग्गामा ॥५॥

( प्रोत्फुल्लवनवल्लरा सिद्धोपशिलाजलाः सुरभिमयूराः ।
प्रसरितविकटकुसुमा उत्साहयन्ति न गिरिग्रामाः ॥

खरपवणरअगलत्थिअगिरिऊडावडणभिण्णदेहस्स ।
धुगधुगइ जीअं व विज्जुआ कालमेहस्स ॥४॥

( खरपवनरयगलहस्तितगिरिकूटापतनभिन्नदेहस्य ।
घुकघुकायत जीव इव विद्युत्कालमेघस्य ॥ )

धाराविधौतवदना लम्बितपक्षा निकुञ्चितग्रीवा ।
वृतिवेष्टनेषु काका शूलाभिन्ना इव मन्यन्ते ॥६॥

ऊर्ध्वकृतमुन्नतम् जलधाराभिर्धाव्यमानम् ( विधौतम् प्रक्षालितम् ) मुखं यासां ते । लम्बितौ प्रसारितौ पक्षौ यासां ते । पक्षौ प्रसार्य ग्रीवां कुञ्चयित्वा, यथा काकाः कण्टकवृतिषु काकास्तथा स्थिताः सन्ति यथा ऊर्ध्वमुन्नतम् [illegible] शूलेन वा ( समन्तात् ) भिन्ना इव दृश्यन्ते । [illegible] कण्टकवृतिषु पक्षौ प्रसार्य ग्रीवां [illegible] चञ्चुं च ऊर्ध्वं कृत्वा काकास्तथा निश्चला अवतिष्ठन्ते यथा शूलप्रोता भवेयुरित्याशयः । तेषामूर्ध्वकृता चञ्चुः शरीरं विदूष्य ऊर्ध्वं निर्गतः शूलाग्रभाग इवालोक्यत इति भावः । [illegible] काकानामेव [illegible] दुर्दिनमपि [illegible] शब्दभ्रम [illegible] ।

मौक्तिकमायतकण्ठा मरकतसूचीनिविद्धमिव पिबति ।
प्रावृट्काले बर्ही तृणाग्रसंगतमुदकबिन्दुम् ॥ ७ ॥

---

धाराधुव्वन्तमुहा लम्बिअपक्खा णिउंचिअग्गीवा ।
वइवेढेसु काआ सूलाहिण्णा व्व दीसन्ति ॥६॥
( धाराधाव्यमानमुखा लम्बितपक्षा निकुञ्चितग्रीवाः
वृतिवेष्टनेषु काकाः शूलाभिन्ना इव दृश्यन्ते ॥ )

मरगअसूईविद्धं व मोत्तिअं पिअइ आअअग्गीवो
मोरो पाउसआले तणग्गलग्गं उअअबिन्दुं ॥७॥
( मरकतसूचीविद्धमिव मौक्तिकं पिबत्यायतग्रीवः
मयूरः प्रावृट्काले तृणाग्रलग्नमुदकबिन्दुम् ॥ )

यदि मयूरः प्रावृट्काले मरकतमणीनीषद् नावलम्बते इति बालस्य शालग्रामस्य यथा इति अवलम्बः। तृष्णा तृणमरकतप्रारम्भ शिरिद तुनरिक्षप्रभया प्राप्ते नीलिकमिव मिथ्ये तृणाग्रमग्नान जलबिन्दून् मयूर कण्ठ मम् पिबति। तत्तममये जलबिन्दुरपि मम्पूर्णमात्राप्त जलाय भवमीयो भवतीत्यर्थः। प्रीता अभ्यो तृष्णा मयूरे हरिततृणाग्रस्य जलबिन्दु यथा पिबति यथा हरितमणिनिर्मितमूषमराकाङ्क्षेण मौक्तिकभेदनातीत्याय। तृणाग्रभागस्थितस्य जलबिन्दो स्वाभाविकी शोभा मयूरस्य च पानकालिक स्वभावाद्वुत भित्तिन इति स्वभावादिरलङ्कार। तृणाग्रभागो जलबिन्दो स्थितिवर्णनेन—स्थानस्य अनन्यतार सूचयता सूच्यते।

दरभिन्नशुक्तिसम्पुटनिलीनहालाहलाग्रपुच्छनिभम्।
पक्वाम्रास्थिविनिर्गतकोमलमाम्राङ्कुरं पश्य॥ ८॥

दरभिन्ने ईषत्स्फुटिते शुक्तिसम्पुटे (शुक्त्यो 'सीप' इति ख्यातयो सम्पुटे गर्भे) निलीन गुप्त ईषद्दृश्यमान इत्यर्थः। यो हालाहल 'बहमनिया' इति प्रसिद्धो जन्तुविशेष तस्य पुच्छाग्रसदृशम्।

---

दरफुडिअसिप्पिसपुडणिलुक्कहालाहलग्गपुच्छणिहम्।
पक्कम्बट्ठिविणिग्गअकोमलमम्बङ्कुर उअह॥८॥

(ईषत्स्फुटितशुक्तिसम्पुटनिलीनहालाहलाग्रपुच्छनिभम्।
पक्वाम्रास्थिविनिर्गतकोमलमाम्राङ्कुरं पश्यत॥)



पक्वस्य आम्रफलस्य यद् अस्थि ( 'गुठली' ) ततो विनिर्गत च कोमल च । आम्रस्याङ्कुर यस्य । हालान्तो महाभर्ये इति सङ्क्षिप्तौ । विजयाङ्कको इति अपपुरमान्ते । बीजकोषविनिर्गतस्य आम्राङ्कुरस्य यथाकारो हालाहल पुष्पमञ्जरी भवन । ततश्च–यदि यथाभयेऽस्मि प्रवासवसि तर्हि लोभ आम्राङ्कुरो महाभर्ये इव मां कथायान्यो दुर्योदिति विरहिणा कान्त प्रति गृह्यते ।

मेघमहिषस्य मन्ये इन्दुदरे सुरचापकोटिभिन्नस्य ।
अन्त्रमिव लम्बतेऽसौ सवेदन मन्दतो विद्युत् ॥९॥

सुरचापस्य (इन्द्रधनुष) कोट्या तीक्ष्णेन कोणाग्रेण उदरे भिन्नस्य पाटितस्य ( विदारितस्य ) । अतएव सवेदन क्रन्दन ( क्रन्दन रोदन कुर्वन ) मेघरूपस्य महिषस्य विदारणाद् बहिर्निर्गत अन्त्रमिव एष विद्युत् लम्बत इति मन्ये । मूले तु–'अन्त्रमिव लम्बते' इति 'अन्तर्' भावेन प्रतीयत इत्यर्थः । इन्द्रधनुष समीपे गर्जन कुर्वन श्याममेघस्य मध्यगता विद्युत्तथा प्रतीयते यथा धनुष्कोट्या पाटितस्य अतएव वेदनावशाद्गर्जनाद् भुवनो महिषस्योन्ने बहिर्निर्गतम् अन्त्र लम्बते इत्यर्थः ।

---

मेहमहिसस्स णाज्जइ उअरे सुरचावकोडिभिण्णस्स ।
सन्वेअणं सणियं अन्तं व पलम्बए विज्जू ॥ ९ ॥

( मेघमहिषस्य ज्ञायत उदरे सुरचापकोटिभिन्नस्य ।
सवेदन सवेदनमन्त्रमिव प्रलम्बते विद्युत् ॥ )

कर्दममग्नहलाग्रोत्कर्षणशिथिलेऽस्य निद्रिते पत्यौ ।
अप्राप्तमोहनसुखा घनसमयं पामरी शपते ॥१०॥

कर्दमे वर्षापङ्के मग्नं यत् हलाग्रं हलमुखं तस्य उत् उत्कर्षणपरिश्रमेण शिथिले । पत्यौ भर्तरि । अनिच्छायामपि श्रमशैथिल्यात् झटिति सुप्ते सति । न प्राप्तं मोहनसुखं सुरतसुखं यया तथाभूता पामरी कृषीवलस्य स्त्री घनसमयं शपति आक्रुशति । अन्यसमये पत्या सह सम्भाषणादिसुखं प्राप्तमासीत् सोऽप्यनेन लोपित इति वर्षासमयं निन्दतीत्यर्थः । वर्षासमये क्षेत्रेषु घनः पङ्को भवति । हलचालनसमये च हलस्याग्रभागस्तस्मिन् पङ्के मग्नो भवति । क्षेत्रपतेर्भृत्य (पामर) हलमुखं महता परिश्रमेणाऽऽकृष्य समतलां क्षेत्रभूमिं करोति । एवं किल सम्पूर्णं दिनं यावत् महता परिश्रमेण रात्रौ स वराको झटित्येव निद्रितो भवति । वर्षाकालेनोद्दीपितमन्मथा तत्पत्नी तु सम्भोगानन्दमप्राप्य पत्युः परिश्रमदायकं घनसमयं शपतीत्याशयः । कर्दममग्नेत्युक्त्या-हलवाहनसमये मध्ये मध्ये उपवेशनविश्रामोऽपि कर्दममग्ने स्थले दुर्लभ इति सूच्यते । कृषकस्य गृहे यो भृत्या कार्यं करोति स प्रान्ते प्रायः पामरपदेन व्यवह्रियते। ततश्च पामरी पदेन एतत्सूच्यते यत् अन्यसेवावश्यस्य तत्पतेर्न तथा स्वातन्त्र्यं यत् हलवाहनकार्ये शैथिल्यं कुर्यात् । अतएव

---

चिक्खिल्लखुत्तहलमुहकड्ढणसिढिले पइम्मि पासुत्ते ।
अप्पत्तमोहणसुहा घणसमअं पामरी सवइ ॥ १० ॥

( कर्दममग्नहलमुखकर्षणशिथिले पत्यौ प्रसुप्ते ।
अप्राप्तमोहनसुखा घनसमयं पामरी शपति )

कुमुन्देषु निभृत स्थिता मधुकरनिकाया मधुपसमूहा । शशिकिरणैः भिन्नेऽपि नाशितस्य समाश्रितस्य तिमिरस्य अन्धकारस्य ( कुन्दादिकुसुमेषु पतिताः ) इमा ग्रन्थयः पोन्तलिका इव राजन्ति। चन्द्रकिरणैः समग्रमप्यन्धकारं नाशितं पर कुन्दादिकुसुमेषु स्थितस्यान्धकारस्य ग्रन्थयः पतिताः सन्ति । श्यामवर्णाः एते भ्रमरा एव ता इमा ग्रन्थयः सन्तीत्याशयः । मसृणया निभृतस्थितया भ्रमराणाम् अन्धकारभिन्नग्रन्थिभिः साम्यम् । 'इमा' इति प्रत्यक्षमुद्रया निर्देशः ।

पौवन इव नववर्षाकाले प्रोन्नतपयोधरे याते ।
प्रथमैककाशकुसुम पलितमिवाऽऽलोक्यते भूमेः ॥१७॥

प्रोन्नता पयोधरा मेघा यस्मिन्नेवभूते वर्षाकाले । प्रोन्नतौ पयोधरौ स्तनौ यस्मिन्नेवंविधे नवयौवन इव याते व्यतिक्रान्ते सति । प्रथमं एकं काशकुसुमं भूमेः पलितमिव वार्द्धक्यजनितकेशशौक्ल्यमिव अवलोक्यते । तथा च—वर्षाकाले यावती शृङ्गाररसोपकरणसामग्री न तावती शरत्समये इति कविः पलितमिति मत्वा परिचिन्तयन्ति ।

निष्पन्नसस्यसम्पद् गायति शरदीह पामरः स्वैरम् ।
दलितनवशालितण्डुलधवलमृगाङ्कासु रजनीषु ॥ १८ ॥

निष्पन्ना सस्यसमृद्धिर्धान्यादिसम्पत्तिर्यस्य एतादृशः पामरः कृषी

---

पाउसम्मि उण्णअपओहरे जोव्वणे व्व वोलीणे ।
पढमेक्ककासकुसुम दीसइ पलिअं व्व धरणीए ॥ १७ ॥

[ वर्षाकाले उन्नतपयोधरे यौवन इव व्यतिक्रान्ते ।
प्रथमैककाशकुसुम दृश्यते पलितमिव धरण्याः ॥ ]

वल तद्रूप्यो वा । इह यस्यां शरदि । दलित कण्डित यो नवशाले तण्डुल, तद्वत् धवल मृगाङ्कश्चन्द्रो यासु । एवंविधासु रात्रिषु स्वैर निष्पत्तिमन्ध गायति । स्वपरिश्रमेण निष्पादिततया 'निष्पादितसस्यमरद् यत्नेऽपि निष्पन्न' इत्युक्त्या दैववशादेव सर्वान् कृषिविघ्नान् उल्लङ्घ्य सस्यसम्पत्तिर्जातेति तस्या दुर्लभत्वसूचनेन चाधिरूढहर्षप्रकर्ष व्यज्यते । शालीनां परिपाके प्रसन्नचेतस पामरस्य हृदये तण्डुला एव अहर्निशमावर्तन्ते । अत एव स्वभावसिद्धतया हालिकस्य पदे दयेतत पदुलेनैव चन्द्रस्य साम्यं समञ्जसमित्यनयोरत्र मार्मिकं ।

क्षीरैकपायिना दत्तजानुपतनेन पङ्कमलिनेन ।
पुत्रेणेव हि शालिक्षेत्रेणाऽऽनन्द्यते हलिकः ॥ १९ ॥

क्षीरं तण्डुलारम्भक जलं दुग्धं च । जानु ऊरुपर्व, उपचाराज्जानु गात्रमभिधत्ते । दत्त जानुभ्यां पतनं येन जानुद्वारा इतस्ततः गमन इत्यर्थे पुत्र

---

णिप्पण्णसस्सरिद्धी सच्छन्दं गाइ पामरो सरए ।
दलिअणवसालितण्डुलधवलमिअङ्कासु राईसु ॥ १८ ॥

( निष्पन्नसस्यर्द्धिः स्वच्छन्दं गायति पामरः शरदि ।
दलितनवशालितण्डुलधवलमृगाङ्कासु रात्रिषु ॥ )

पङ्कमइलेण छीरेक्कपाइणा दिण्णजाणुवडणेण ।
आणन्दिज्जइ हलिओ पुत्तेण व सालिछेत्तेण ॥ १९ ॥

( पङ्कमलिनेन क्षीरैकपायिना दत्तजानुपतनेन ।
आनन्द्यते हलिकः पुत्रेणेव शालिक्षेत्रेण ॥ )

यथा। इस इन आतुरयानीयानां पाण्डनाकामम्भीनां ("पोटा इति प्रवषु") प्रयाणानाम्) आरम्भ यन ननम—पाण्डनाकामम्भीनामारम्भापरिमन् जान ईशान शाखिश्रेष्ठ। पुत्रप इव हाखिक आनम्दन आनन्दं प्राप्यत। पुष्पशाखिना आतुर्या कृतमनेन पङ्कजिनेन पुष्प यथा आनन्दते, तथैव हाखिक तत्पुष्पारम्भकप्रपशाखिना पाण्डनाकामां आरम्भ एतेन पद्मखिनेन एतेनापि आनम्दत इत्यादय। अनुनाथिना पुष्प मा ज्ञाना इत्यता एव शाखिश्रेष्ठेऽपि शाखिजनाय इवमपीतिपाय स्वप्यते। पुत्रो यथा पाण्डुपुत्रजैन स्थिरं स्थान तथा एवमपि शिव राजते इति इसो साक्षं समन्ततमेव।

कुसुमानि मालतीनां दग्ध्वा माऽश्वहि निर्वृत शिशिर।
कर्तव्या विगुणानां कुन्दानामपि समृद्धिरथ ॥ २० ॥

मालतीनां मालतीपुष्पाणां कुसुमानि दग्ध्वा शिशिर ...

नाहिर । अमे मम निर्गुणानां सपत्नीनां सौभाग्यमपि सपादयिष्यन्तीति तस्यास्तात्पर्यम् ।

विकसदरविन्दमन्दिरमकरन्दानन्दिता मिलिन्दालिः ।
मधुरमधुमासलक्ष्म्याः कृष्णा मणिमेखलेव शिञ्जाना ॥२१॥

विकसत् ( अत एव बृहत् ) यद् अरविन्दमेव मन्दिरम् । तत्र मकरन्द पुष्परसेन आनन्दिता मिलिन्दालिः भ्रमरपंक्तिः । शिञ्जाना झणु झणु इति रवं कुर्वती सती । मधुमासलक्ष्म्याः चैत्र ( वसन्त )-मासलक्ष्म्याः कृष्णमणिघटितत्वात् कृष्णा मणिमेखलेव मणिनिर्मितरशनेव । भातीति शेषः । मेखलेव झणझणायते इति प्राकृते । मेखलेव शिञ्जाना झणझण शब्दायमाना भातीति संस्कृते । द्वयोरर्थः समानः । श्यामा इव भ्रमरपंक्तिर्न शब्दायते अपि तु कृष्णमणिनिर्मिता मधुमासलक्ष्म्याः काञ्ची इव झणझणायते इत्याशयः । भ्रमराणां गुञ्जनशब्दपूर्वो हि मकरन्दानन्दितेति । मकरन्दपानेन मत्ता तेषां आनन्दजनितः शब्दोऽप्यधिको भवतीति तात्पर्यम् ।

पश्यत पटलविलम्बितनिजतन्तुतलोर्ध्वपादपरिलग्नम् ।
दुर्लक्ष्यसूत्रसंगतबकुलकुसुममेकमिव हि मर्कटकम् ॥ २२ ॥

पश्यत छदिषि विलम्बितः अवतीर्णो यो निजतन्तुः तस्य तले

---

मन्दारविन्दमन्दिरमअरन्दाणन्दिआलिरिञ्छोली ।
झणझणइ कसणमणिमेहल व्व महुमासलच्छीए ॥२१॥

( बृहदरविन्दमन्दिरमकरन्दानन्दितालिपङ्क्तिः ।
झणझणायते कृष्णमणिमेखलेव मधुमासलक्ष्म्याः ॥ )

[illegible] सुयोग्यत्वमेव पारतन्त्र्य [illegible] । [illegible] — [illegible]
[illegible] तस्या [illegible] इति [illegible] तस्या [illegible]
[illegible] ।

शरदि हि महाह्रदानामम्भः शिशिराणि भवितव्यानि ।
जातानि तुहिनसज्जनहृदयसदृशानि राष्ट्रिमानि ॥ ११ ॥

शरत्काले—महतां ह्रदानाम् [illegible] ( [illegible] ) [illegible] ।
तुहिन [illegible] । [illegible] शीतलानि [illegible]
[illegible] । शरत्काले [illegible] न भवति । [illegible]
[illegible] शीतलानि
[illegible] । तुहिन [illegible] हृदयम् [illegible]
[illegible] [illegible]
[illegible] । एवं च [illegible] भवति ।
[illegible] तु स न [illegible] भाव ।

अन्योन्यमन्यकाले गगने दिशासुखेषु विगलति ।
उन्मीलित मन स्फुरति विच्या सर्वविषयमाने ॥१२॥

[illegible]
[illegible] दिशामुखेषु [illegible]

---

[illegible] [illegible] [illegible]
[illegible] [illegible]

( [illegible] [illegible] [illegible] [illegible] )

विन्ध्य (पर्वत) मुरलीमिव बलवन्तमिव मुञ्चति। विन्ध्यशैलस्योर्ध्व भा मेघा पूर्वमवतरन्ति, पश्चाच्च तं परित्यज्य दिक्षु इतस्ततः गच्छन्ति। ततश्च पश्चिमभागे विन्ध्यं परित्यज्य मेघाः पृथग्भवन्ति, तदा तथा प्रतीयते यथा विन्ध्यः स्वं (मेघरूपम्) परित्यजतीत्यर्थः। यथा कश्चि- त्कुसुमितं वल्कलं विमुच्य गमितरो भवति, तथा विन्ध्यो मेघावरणं स्वं विहाय पुनः नवो सुरभो भासमानोऽपि भाव। शरत्कालस्य नवत्वम् भावकस्य व्यज्यते। मुरली खलु 'मुरज'। 'मुरली वीणायां मरज्जे मरण्ले कुसुमन्मरे' इति मेदिनी।

सैन्धवपर्वततुल्यानि पश्य धुततूलपुञ्जसदृशानि।
मुक्तोदकानि सुतनो! शरदि सिताभ्राणि शोभन्ते ॥१३॥

लवणपर्वतसदृशानि, धुनस्य तन्त्वपातेन विरलितावयवस्य (धुना हुआ) तूलपुञ्जस्य सदृशानि त्यक्तजलानि सिताभ्राणि श्वेत

---

सव्वत्थ दिसामुहपसरिएहिं अण्णोण्णकडअलग्गेहिं।
छल्लिं व्व मुअइ विञ्झो मेहेहिं विसघडन्तेहिं ॥१२॥

( सर्वत्र दिशामुखप्रसृतैरन्योन्यकटकलग्नैः।
वल्कलीमिव मुञ्चति विन्ध्यो मेघैर्विसंघटमानैः ॥ )

उअ सिन्धवपव्वअसच्छहाइँ धुअतूलपुञ्जसरिसाइं।
सोहन्ति सुअणु मुक्कोअआइँ सरए सिअब्भाइं ॥ १३ ॥

( पश्य सैन्धवपर्वतसदृशानि धुततूलपुञ्जसदृशानि।
शोभन्ते सुतनु मुक्तोदकानि शरदि सिताभ्राणि ॥ )

मेषाः शोभन्त इति हे सुजनो ! त्व पश्य । शरत्काले श्वेतमेघाः कीदृशाः प्रतीयन्ते इति स्वाभाविकरूपेणोपमितम् । शरन्मेघच्छादनं नि र्गोदन समात् लोकान् निम्न्मी सखी चेरयामाह, इति करिवत् । तत्र—पर्वत सादृश्येन कठोरत्व जडत्व च सैन्धवेत्यनेन पुन सुखशालितया धारियर मलवत्त्व सूच्यते । तथ ('२६ ) सादृश्येन स्वाभाविक साधनम् धुतेन्यनेन बहुराशित्वस्तूनत्व च व्यज्यते । प्रभवदेन च—भस्तुषेपि रिक्तैर्मेघैर्यथा न फलमिदित्स्या कुलान्निता उन्नतैरपि निर्धनैर्जनै [illegible] फलमिति परथा शंति सूच्यते । 'शोभन्ते इति सादृश्येऽपि' । निर्गतपयसा इमे भासन्तीति व्यङ्ग्यार्थे । तत्र 'सुजनो !' अर्थात् सुन्दरशरीरा किम्पारत्वम निर्धने रेभिर्न किञ्चित्प्रयोजनमिति भावो ध्वनि ।

पङ्क्तिं तरुकोटरतो निष्क्रान्तां पश्य शुकानां हि ।
शरदि द्रुमो ज्वरित इव सलोहित पित्तमिव वमति ॥१४॥

तरुकोटरतः वृक्षकोटरात् निष्क्रान्तां शुकानां शरत्कालीनानां शुकानां पङ्क्तिं पश्य । शरत्काले ज्वरयुक्त इव द्रुमः वृक्षः सलोहित सरुधिर पित्तमिव वमति । वमतीव । शरद्वर्णोऽपि चञ्चू-ताम्रदलिका भिर्युक्ता हरितवर्णा शुकानां पङ्क्तिर्वृक्षकोटरात् निःसरति यदि तु शरद् ज्वरपीडितो वृक्षो रुधिरसहितं हरितवर्णं पित्तं वमतीत्याशय । शरज्ज्वर

---

उअह तरुकोडराओ णिक्कन्तं पुसुआणँ रिञ्छोलिं ।
सरिए जरिओ व्व दुमो पित्त व्व सलोहिअं वमइ ॥१४॥

( पश्यत तरुकोटरान्निष्क्रान्तां शुकानां पङ्क्तिम् ।
शरदि ज्वरित इव द्रुमः पित्तमिव सलोहितं वमति ॥ )



[illegible]पादैः परिहारम् । दुर्दैवे अनिपुणे गृहे सत्यम् एव बकुलकुसुमम् इव [illegible] मर्कटके सूनो [illegible] । [illegible] [illegible] अपि तु अनिपुणे गृहे [illegible] बकुलकुसुम[illegible] । सर्वं [illegible] । [illegible] बकुलकुसुमे [illegible] कुसुमम् । 'अथ मर्कट[illegible]' [illegible] 'सखी' ।

मधुमासमागताऽऽगममधुकरसंचारनिर्भरेऽरण्ये ।
गायति विरहातुरपथिकमनोमोहनं गोपी ॥ २१ ॥

मधुमासपदेन [illegible] [illegible] [illegible] यो मधुकराणां [illegible] तेन निर्भरं [illegible] अरण्ये । विरहातुरैः [illegible] पथिकानां मनोमोहनं [illegible] यथा गोपी गायति ।

---

[illegible] ॥ ६ ॥

([illegible]
[illegible] )

मधुमास[illegible]
[illegible]

( मधुमास[illegible]
गायति विरह[illegible] )

विरहवेदनासूचकैरपौर्गुम्फितं गीतं तथा गायति यथा मार्गगामिनां पथिकानामपि मोहो भवति । अस्मद्वनितानामपि मधुमासेऽस्मिन्नेव विरहवेदना भवेदिति चिन्तया पथिकानां मनोमोह इति तात्पर्यम् । मधुकरझंकारसहकारेण गीतैर्मधुरगम्भीरनादिता मधुमासपवनाघातेन च गीतैर्दूरदूरं गमनं व्यज्यते । अत एव अरण्ये दूरस्था अपि पथिका मुह्यन्तीत्याशयः । गोपी गोपालिका कलमगोपी धान्यरक्षिणी वा ।

शुकमुखसच्छायैः किल पलाशकुसुमैर्विराजते वसुधा ।
बुद्धस्य चरणवन्दनपतितैरिव भिक्षुसंघातैः ॥ २४ ॥

बुद्धस्य गौतमबुद्धस्य चरणवन्दनार्थं पर्यन्ततो दण्डवत्पतितैः 'भिक्षुसमूहैरिव रक्तवर्णतया शुकमुखसदृशैः' पलाशकुसुमैः किंशुकैः इति यावत् । पृथिवी शोभते । मध्ये आसीनस्य बुद्धदेवस्य चरणवन्दनार्थं सहस्रशो बौद्धभिक्षव समन्तात् भूमौ यथा प्रणमन्ति तथैव रक्तवर्णपत्रिकायुक्तानि सहस्रशः पलाशकुसुमानि भूमौ पतितानि सन्ति । तैश्च सा शोभते इत्याशयः । लोहितवर्णानि पलाशकुसुमस्य पत्राणि बौद्धभिक्षूणां वस्त्ररञ्जनीयानि, तद्वृन्तं च शिर इवानीयमिति प्रणतभिक्षुसादृश्यं बोध्यम् । वसन्ते किंशुकशोभावर्णनम् । सहैव च प्रवासं गच्छतः कान्तस्य यात्राप्रतिबन्धनं व्यङ्ग्यम् । यतो हि भिक्षुसम्प्रदायेन वर्षासमये निषिद्धा ।

---

कीरमुहसच्छहेहिं रेहइ वसुहा पलासकुसुमेहिं ।
बुद्धस्स चलणवंदणपडिएहिं व भिक्खुसंघेहिं ॥ २४॥

( कीरमुखसदृशैः राजते वसुधा पलाशकुसुमैः ।
बुद्धस्य चरणवन्दनपतितैरिव भिक्षुसंघैः ॥ )

(प्रतिनशिम्नाना श्रेणि) तथा दीपिते प्रज्वलिते वनप्रान्तरे । किंशुकवृक्षाभिद वनमिति मत्वा मुग्धो हरिणो न निर्गच्छति । रक्तवर्णाभिर्वह्निशिखाभिर्व्याप्त वन रक्तवर्णं किंशुकवृक्षैर्वक्षयिते मत्वा मुग्धस्य हरिणस्य भ्रमो जात इत्याशय । सहृदयानां मनुष्याणां का कथा परन्तु हरिणानामपि हृदये वसन्तस्य तावत्प्रभावो व्याप्तो यत्—तत्प्रभावमुग्ध सोय हरिणो वनाग्निदीपितमरण्यमपि किंशुकव्याप्त मन्यते । तथा च वसन्तस्य तुलाम प्रभावो व्यज्यते ।

क्षेम कुरु भो क्षेम योऽसौ कुब्जाम्रको गृहद्वारे ।
तस्य किल मौलिदेशात्किञ्चिदनर्थं समुत्पन्न ॥ २७ ॥

कुरु कुरु । क्षेम कुशल कुत्रास्ति भो क्षेमम् । साम्प्रतं कुशल मित्यर्थ । क्षेम कुत्र धनम् इति धातुपरीक्षी 'मुक्तावलि । यथा—तव इयद्धन कुत्र धनम् ? अतिशयधृतन प्रयोजनम् । कथ क्षेम नास्ति

---

तम्मिरपसरिअहुअवहजालालिपलीविए वणाहोए ।
किंसुअवणति कलिऊण मुद्धहरिणो ण णिक्कमइ ॥ २६ ॥
( तास्मन्प्रसृतहुतवहज्वालावलिप्रदीपिते वनाभोगे ।
किंशुकवनमिति कलयित्वा मुग्धहरिणो न निष्क्रामति ॥ )
खेम कत्तो खेम भो मो सुअण्डओ घरद्दारे ।
तस्स किल मत्थआओ कोवि अणत्थो समुप्पण्णो ॥२५॥
( क्षेम कुत्र क्षेम योऽसौ कुब्जाम्रको गृहद्वारे ।
तस्य किल मस्तकात्कोऽप्यनर्थं समुत्पन्न ॥ )

---

* 'तुम्हारे पास इतना धन कहां है धन ?, यहां धन का विशेष प्रभाव सूचन करने के लिए धन प्रयोग है ।

तद्गद—शुद्दारे योगी दुष्प्रादार स्वरर प्राप्नुवारिण तरपापि शिरो भागात् कश्चित् पनधे समुन्नव पपुरो ( शुकुम ) निर्गत इत्यर्थः । ररावनुपा रुनुमयन् पन्लवात समाप्य इति सूच्यते । अधुना मालतीनां विरहिणोनां दुरवम च इति तस्या दुरामप्रमत्वात्मा विरहिणा हुमालिनि दोप्यम् । 'प्रापत इति दुरितमार्थे वन् प्रत्यय । तथा च दुरितानामपि पापानां नवशुद्धवरिव दला तर्हि समन्तात्मभति तान् ररावनुभान् दृष्ट्वा काऽपे दला रवाभिनि सूच्यते । नार्थ शुकुम ह्मिरहमारमालो इने पनर्थ इति पानशुद्धवनशुरीरवनपरिशरा रम्यत ।

विरहिनीवाऽरण्ये दु सहरविरश्मिसंतप्ता ।
अतिनारस्मितिविरनेर्मदोदरा ग्रीष्ममध्याह्न ॥ २८ ॥

ग्रीष्मतौमध्याह्न दुःसहानि पूर्वरश्मिभि ( किरणै ) सन्तप्ता महीरुह वृक्षा अपि कश्मिर ( सम्पुर ) भिल्लीनाम् ( झींगुर ) विरत हारण रुदित इव । मध्याह्न भिल्लीनां लवरा कलिन किन्तु सूर्यतापसन्तप्ता इमे वृक्षा अद्यतनीय नैतालाना नाहर इत्यपाव । अतएव इत्यतत वातलवपातमपि परत तला नहि अनवर्णितवनं च रता इत्यादिति सूच्यत । यथा रत्नाभिव्येन— पथवह वपि स अपनवपन्न

रविरन्ति इव पारल्प दुस्सहाद्रिरतापसन्तप्ता ।
परनारभि अतिवए ट पावका निम्नम धारण ।

( रनुमीतापत्र दु सहरविर्तप्तत्तप्ता
अतिनाविरभितविरन नम्रय ग्रीष्मम मध्य ॥

धरयाद् मेघो ते । अत एव त्रिपुरौ कम्पितौ पशुगो यस्ते । एव बहु मीहिरतन कर्मपरयसमास । पूयमवरयाः, विहङ्गा पथिण तरल्गा गिरिरेषु उपरिभागेषु कथमपि सेदिपति सभन्त प्राप्नुवन्ति । नीलेति शारारिन्त्रिवलेन तासाम् चार्द्रतया स्निग्धत्व सूच्यत । अत एव पथिया पन्स्वलाभिति भाव । अयं भाव—सायसमये तरपु र त्रिनिषाल चाम्पुम्त (अत एव दूरम उड्डीयामता) पथिया समुच्चषेषु लघु शाखाग्रभागेषु पूर्वं स्थातुमिच्छन्ति । तानि च पत्राणि सर्वा भारता उन्नमन्ति। अत एव ईषदवरपयन्ति सेवासमन्त चरवार्द्र स्निग्धेभ्य शाखाग्रेभ्यो विसस्लति । ततश्च पतन्तस्ते पक्षपुट विधुवन्त पुनरपि स्थातु प्रयतन्ते । एव कथमपि तपु सेदिपति सभन्ते इति ।

स्वाभाविकप्रेमवर्णनम्—

विपिना तृणमथ विपिना पानीप सर्वत स्वपप्राप्यम् ।
हरिणाना हरिणीना तथापि च प्रेम मरणान्तम् ॥ ११॥

विपिनात् वनात् तृणम् अथ विपिनादेव पानीय (जलम्)

---

भरणमिव्वणीलसाद्र्ममाणलिमचलणद्धविहुअपक्खउडा ।
तरुसिहरेसु विहङ्गा कहँ कहँ वि लहन्ति सत्थाणम ॥ ५० ॥

(भारमिलनीलशाखाप्रकम्पितमधाद्विधुतपक्षपुटा ।
तरुशिखरेषु विहङ्गा कथं कथमपि लभन्ते संस्थानम् ॥)

रण्णाउ तणं रण्णाउ पाणिअं सव्वअं सअंगाहम
तह वि मआणँ महण अ आमरणान्ता पम्मा ॥ ५॥

(अरण्यात्तृणमरण्यात्पानीय सर्वत्र स्वयंग्राह्यम् ।
तथापि मृगाणां मृगीणां च मरणान्तानि प्रेमाणि ॥)

मृदङ्गस्य नतोन्नतत्वेन आलवालीकृतमस्तोपर्येव स्थापनात् । द्विमुख उभयमुख , उभयतो वाद्यस्थानसत्त्वात् । यथाविधो मुरजोऽपि यावन्मुखे यस्य पिष्ट-(चूर्ण)-क्षेपो भवति तावदेव मधुर मधुरनादेन श्रुतिसुखावहो भवति । पिष्टलेपे नीते अर्थात् शुष्कतया समादरणोचित याने शिम मीरलम् अप्रिय यथा स्यात्तथा आरसति शब्द करोति । मृदङ्गस्य मुखे यावत्काल पृष्ठलेप अवतिष्ठति तावदेव स मधुरं स्वनति तथा दुर्जनस्य मुखे यावत्काल भोजन तिष्ठति तावदेव मधुराणि चाटुवचनानि च जल्पति अनन्तर तु निन्दां करोतीत्याशय । 'आनने यावत् तावन्मधुर ' इत्यत्र आनन इति सप्तम्या 'अवस्य आननस्य च परान्तसम्बन्धे अन्येन अर्थात् मुखावरणावसाने ॥ चाटूनि कुरुत ' इत्यर्थ मृदङ्गेन दिग्मुखस्य अन्यान्य स्वाधारता व्यज्यते । 'अनुलीन ' इत्यत्र सन्तुलनाना न स्वार्थमात्रिकमित्रादिप्रवर्तिन इति सूचना । शङ्कनादभावानवद्यावेक्षया अथवा गुरुमण्डपि क्रियतमप्रशंसिनि मार्दि द्विजमहीनीयम् ।

जो-गों या निजदव्वे तं मित्र परिसल्ल व्यसने ।
नह्य यत्र गुणाभ्यन्तिमान न यत्र धर्मं ध्यान ॥ २४ ॥

न यत्र धनमस्ति न ध्यानं इत्थ यदि परस्वगते न नद्य

---

या या ता जा इ य न मित्र न निरन्तर व्यसने ।
न यत्र अ य गुणा न विनयाणि धर्म धर्मो ॥ २४ ॥

या या वा इत्थ सखिन सखिनामर्द व्यसने ।
नहि यत्र गुणाभ्यन्तिमान यत्र धर्म ॥ )

याव न्निरस्यति । सुजने कृता तु सा मैत्री पाषाणे कृता रेखा इव अनघा निरपाया कालान्तरेऽपि नाशायोग्या भवतीत्यर्थः । 'क्रियमाणा' इति वर्तमानकालार्थकशानच्प्रत्ययेन— खलजने कृता मैत्री यावत्पर्यन्तं पूर्णापि न सिध्यति तत पूर्वमेव खलस्य दौरात्म्येन भज्यते' इति व्यज्यते । पाषाणस्य रेखा '' 'पत्थर की लकीर' इति लौकिकप्रवादस्य कियन्माधुर्येण निर्वाह इति सुधीभिरालोच्यम् ।

उन्नतमेव मनः स्यान्मनस्विनो ह्यन्तिमास्वपि दशासु ।
किरणाः स्फुरन्ति सततमस्तमनेऽप्यूर्ध्वमेव रवेः ॥ ३७ ॥

अन्तिमासु मरणान्तिकासु अपि दशासु मनस्विनो धीरपुरुषस्य मनः उन्नतमेव भवति । अस्तगमनेऽपि सूर्यस्य किरणा नित्यम् ऊर्ध्वमेव स्फुरन्ति गच्छन्ति चाऽपि च । सूर्यकिरणानामूर्ध्वगमनमिव यथा स्वाभाविकं तथा मनस्विमानसस्योदारत्वमपि स्वाभाविकमिति सूर्यदृष्टान्तेन मनस्विनो महिमातिशयो व्यज्यते ।

---

कीरन्ती च्चिअ णासइ उअए रेह व्व खलअणे मेत्ती ।
सा उण सुअणम्मि कआ अणहा पाहाणरेह व्व ॥ ३६ ॥
( क्रियमाणैव नश्यत्युदके रेखेव खलजने मैत्री ।
सा पुनः सुजने कृता अनघा पाषाणरेखेव ॥ )

तुङ्गो च्चिअ होइ मणो मणसिणो अन्तिमासु वि दसासु ।
अत्थमणम्मि वि रइणो किरणा उद्धं चिअ फुरन्ति ॥३७॥
( तुङ्गमेव भवति मनो मनस्विनोऽन्तिमास्वपि दशासु ।
अस्तमनेऽपि रवेः किरणा ऊर्ध्वमेव गच्छन्ति ॥ )

वदनात्सुजनस्य सुतोऽमिय सुदूरोपरञ्जितस्यापि ।
राहुमुखेऽपि हिमांशोः किरणाः पीयूषमेव मुञ्चन्ति ॥ ३८ ॥

सुदूरोऽपि कलुषितस्य दुर्मनायितस्यापि सुजनस्य मुखात् । अमिय वचनमेवाऽऽ स्रवते पुन ? अवनि कथा पूज्यते । राहुमुखेऽपी ग्रस्त—पैरिता सुधुश्माक्रान्तापि हीनभावुर्येवाऽमृतमेव वमति न गरलम् तथैव दुर्जनैः खेदितापि सुजनो निजस्वभावसिद्ध हितमेवाऽऽच रति नाऽप्रियमिति भावार्थो निश्चयो व्यज्यते । राहुदृष्टान्तेन—सर्वथा ग्रस्तोऽपि सज्जन स्वभाव न मुञ्चतीति व्यज्यते ।

अविनिर्गतानि कलहान्तरेऽपि हृदये जरामुपेतानि ।
सुजनश्रुतानि दहनो दहति रहस्यानि वायुप पूर्ता ॥ ३९ ॥

कलहान्तरेऽपि कलहमध्येऽपि अविनिर्गतानि मुखाद्बहिरनि-

---

दूरोसरकलुसिअस्स वि सुअणस्स मुहाहि णिस्सरइ अमअं ।
राहुमुहम्मि वि ससिणो किरणा अमअं विअ मुअन्ति ॥ ८ ॥

( दूरोत्कलुषितस्यापि सुजनस्य मुखान्निय पुन ।
राहुमुखेऽपि शशिन किरणा अमृतमेव मुञ्चन्ति ॥ )

कलहन्तरे वि अविणिग्गआइं हिअअम्मि जरमुवगआइं ।
सुअणसुआइं रहस्साइं डहइ आउक्खए अग्गी ॥ ९ ॥

( कलहान्तरेऽप्यविनिर्गतानि हृदये जरामुपेतानि ।
सुजनश्रुतानि रहस्यानि दहत्यायुःक्षयेऽग्नि ॥ )

सृतानि । हृदये जराम् उपेतानि बहुकाल स्थितानि । सुजनेन भुक्तानि रहस्यानि गोप्यवृत्तानि आयुष क्षये अग्निदहति न पुनरन्यस्मिन् सक्रामन्तीति भाव । हृदये जरामुपेतानीत्यनेन—सुजन परस्य रहस्यानि स्वयमपि पुन स्मरणेन नावर्तयति किन्तु स्वयमेव तानि शनै शनैर्मन्दीभूतानि भवन्तीति सौजन्यातिशयो व्यज्यते । दहनो दहतीत्यनेन 'दहन' उभोपि पुन्त्वा बलप्रयोग भयदर्शनादिभिस्तानि बहिष्कर्तु प्रभु सोपि दग्धुमेव समर्थो न मोक्तुमिति व्यज्यते ।

अवमानितोपि सुजनो विभवविहीनोपि दूयते न तथा ।
असमर्थ प्रतिकर्तुं यथा परैर्मान्यमानो हि ॥ ४० ॥

धनादिवैभवरहितोपि तथा अवमानितोपि क्रोधैस्तिरस्कृत अपि सुजनस्तथा न व्यथते यथा प्रतिकर्तु प्रत्युपकार कर्तु असमर्थ स परैर्मान्यमान धनदानादिना सम्मान्यमान सन् व्यथते । प्रत्युपकार विना परै कृतेन सम्मानेन मन्त्री सन्तोऽप्ययमसन्तुष्टस्तीति भाव । अवमानितोपि विभवविहीनोपि इति अपिद्वाभ्याम् अवमाना वैभवहीनता च यद्यपि क्लाकारा चित्त सतापयत परं सज्जनस्तदेतद् सहते। परं प्रत्युपकाराऽसामर्थ्य मनि व्यथयते । कृतस्य सम्मानस्यामे न किञ्चिद् गणयतीति सुजन प्रत्युपकारासमर्थतायो सम्मानस्याऽत्यन्त भाराऽवहत्वे

---

अवमाणिओ वि ण तहा दुम्मिज्जइ सज्जणो विहवहीणो ।
पडिकाउं असमत्थो माणिज्जन्तो जह परेण ॥ ४० ॥

( अवमानितोपि न तथा दूयते सज्जनो विभवहीन ।
प्रतिकर्तुमसमर्थो मान्यमानो यथा परेण ॥ )

स्यन्त । ' तदा न दृश्यते इति तत्पदेन अन्यत्वधानामपेक्षया सेव प्यथा अधिकस्नात्वकारिणीत्यभिप्रायो ज्ञायते ।

चाप स्वभावसरल क्षिपति नर स्ति गुणेपि निपतन्तम् ।
ऋजुकस्य च वक्रस्य च सम्बन्ध किं चिर भवति ॥ ४१ ॥

चापो धनु स्वभावेन सरलम् ऋजुकम् ( ' सीधा ) गुणे प्रत्यञ्चा [illegible] निपतन्तम् अपि सकत्पमानमपि शर काण्ड क्षिपति दूर निपातयति । एतत्समर्थनायार्थान्तरन्यासमाह — ऋजुकस्य ( सरलस्य ) वक्रस्य च सम्बन्ध किं चिरकाल स्थायी भवति ? नहि नु नैवेत्यर्थ । एव च — स्वभावेन सरल निष्कपटम् गुणे विद्याविनयादौ निपतन्तम् अनुरागेणाऽभिमुखीभवन्तमपि ऋजुकं जन कुटिला दूर परिहरन्तीति श्लेषेण प्रस्तुताऽर्थ । विरोधिनियम — यदि सम्बन्धो भवन्नपि न स स्थायी यदि नु स्वभावामभवति सूच्यते ।

सदसद्दु स च मृग चरस्य या जानन नूनम ।
ता सन्ति पुर महिला नाना हि जरा मनुष्याणाम ॥४२॥

या महिला मृगस्य मृगत्वानना [illegible]
[illegible]

---

चावो सहावसरल [illegible]
वक्कस्स उज्जुअस्स [illegible]

( चाप स्वभावसरल [illegible]
वक्रस्य ऋजुकस्य [illegible] ।

)

धान्यमर्दनस्थानस्य ('खलिहान') सङ्ग कथमिव भवेदिति व्याख्यन अवनतमुख परिपाकगुरुतया अवनत मुख शीर्षाग्रं यस्य स, सशूक शूकेन धान्यकण्टकेन सहित शालि सतुषतण्डुल नीहारे तुषारव्याजेन रोदिति इव। अयेऽत्र शालिरपि परिणामे खलसङ्गेन रोदिति तर्हि सहृदयानां का कथा स्यात्। अत एव तत्सङ्ग परिहर्तव्य इति व्यज्यते।

ये ये गुणिनो ये ये च दानिनो ये विदग्धविज्ञाना।
दारिद्र्य रे विचक्षण तेषां त्वं सानुरागमसि ॥ ४८ ॥

ये गुणिन गुणयुक्ता (दान-वैदग्ध्येभ्योऽन्यगुणयुक्ता) ये दानशीला य च विदग्धविज्ञाना विदग्ध निपुण विज्ञान येषाम् विज्ञाने निपुणा इति यावत्। अनेन तेषां सर्वतोमुख वैदग्ध्यमित्यभिप्रायो व्यज्यते। अथवा विदग्धाश्च विज्ञानाश्चेति द्वन्द्व। विदग्धाश्चतुरा। (विज्ञाना विशिष्ट ज्ञान येषाम् विशिष्ट विद्वांस इत्यर्थ)। हे विचक्षण चतुर दारिद्र्य तेषां जनानां त्व प्रीतियुक्तमसि। निर्गुणान् विहाय गुणिन एव त्वमाश्रयसीति भाव। तान् पीडयसीति तात्पर्यं, सानुरागमनीत्युक्त्या- अनुरक्तो यथा कश्चिदनुरक्तमाश्रयं प्रेमवशात् पीडयति तथा त्वमपि तथा तान् पीडयसि येन ते विरक्ताः, अत एव त्व अतीव चतुर इति विमृश्य चकितमिति सूच्यते। तथा च गुणिनो

जे जे गुणिणो जे जे अ दाइणो जे विअड्ढविण्णाणा।
दारिद्द रे विअक्खण ताण तुमं साणुराअं सि ॥ ४८ ॥

(ये ये गुणिनो ये ये च दानिनो ये विदग्धविज्ञाना।
दारिद्र्य रे विचक्षण तेषां त्वं सानुरागमसि ॥)

निरिवृत्ति प्रसन्ना एव तिष्ठन्ति अनाभावसाद् गच्छन्तीति तरां मनस्विता निरासो लभ्यते । 'विचरत' इति सुभग सम्बोध रे इति नीचसम्बोधनेन-भावनेन प्रथममति त्व गुरुजनानुरागवशात्परस्परमि पाऽमीति निश्चयरामयो सौन्दर्यं सूच्यते ।

बधिरान्धा जगति धन्यास्त एव जीवन्ति मानुषे लोके ।
शृण्वन्ति न पिशुनवचः पश्यन्ति न ये च खलसमृद्धिमपि ॥४६॥

बधिरान्धा—बधिराश्च अन्धाश्च । बधिरा पिशुनानां दुर्जनानां वचनं न शृण्वन्ति अन्धाश्च खलानां समृद्धिं न पश्यन्ति अत एव ते जीवन्ति । जीवनमत्र सफलजीवनरूपे अर्थान्तरसंक्रमितम् । तथा च तेषामेवास्मिन् लोके जीवनं सफलं यत् ते दुर्जनवचनमर्मेषु भि द्यमानानां मानुषाणामिति वस्तुनर्थेऽत्र लभ्यते । मानुषे लोके इत्युक्त्या—दिव्यलोकेष्वपि तु दुर्जनवचनश्रवणादयमर्मान्तरस्य पीषन भवन्तीति—दुर्जनवचनाऽनन्तरत्वानां मिलनकलनस्य दुःखस्य लभ्यते । बधिरान्धा धन्या इत्युक्त्या—पिशुनवचनमृत्तिभ्रम अतः वरं बिध मानसवेदनस्य न बधिरान्धानामवस्थापि … अन्यनिति वस्तु स्वानपि निर्वेदातिशयो व्यज्यते ।

धन्या बधिरा अन्धा … जीवन्ति मानुषे … ।
न शृण्वन्ति पिशुनवचनं खलानां ऋद्धिं न पश्यन्ति ॥ ॥

( धन्या बधिरा अन्धा एव जीवन्ति … लोके ।
न शृण्वन्ति पिशुनवचने … न प्रेक्षन्ते । )

ते विरला सत्पुरुषा स्नेहो येषामभिन्नमुखराग ।
अनुदिवसवर्द्धमान पुत्रेष्वृणमिव हि सङ्क्रामेत् ॥ ४७ ॥

न भिन्नो मन्दीकृतो मुखरागो मुखप्रसादो यत्र अर्थात् स्नेहवशो मुखराग कदापि न परिवृत्त, "मुँह की लाली न हटी" इति हिन्दी। येषां स्नेह ऋणमिव पुत्रेषु सङ्क्रामेत् अनुगच्छेत् ते सत्पुरुषा विरला सन्ति। ऋणमपि न मुच्यते किन्तु उत्तमर्णाय देयम् अस्ति यथा पुत्रे सङ्क्रामति अवतरति तथा स्नेहोऽपि येषां वंशपरम्परया अनुगच्छति सुजनस्नेहस्याक्षयत्वं सूच्यते। पुत्रेषु इति बहुवचनेन 'न एकस्मिन् द्वयोर्वा पुत्रयो, किन्तु सर्वेषु इति वंशव्यापकत्वं व्यज्यते। अत्यन्त-निकृष्टस्य ऋणस्य परिशोधो यथाऽऽवश्यकस्तथा स्नेहनिर्वाहोऽपि उभाभ्यामावश्यकतत्वं व्यज्यते। पुत्रेषु अनुवर्तेत अनुगच्छेत् इव अनुबन्ध सङ्क्रामेत् इति पदेन पितरि च स्नेह व्यतीतवत्यपि पुत्रं गच्छेत् इति सुजनस्नेहस्य अविच्छिन्नपरिवर्तनीयत्वं व्यज्यते। अनुदिवसवर्द्धमान इत्युक्त्या क्रमशोऽपि वर्द्धमान स्नेह स्वाभाविको भवति। तदैव मधुरत्वं सौभाग्योऽपि सूच्यते। अत्र च—मालागुणी उपमा अलङ्कार।

---

ते विरला सप्पुरिसा जाण सिणेहो अहिण्णमुहराओ ।
अणुदिअहवड्ढमाणो रिणं व पुत्तेसु संकमइ ॥ ४७ ॥

( ते विरलाः सत्पुरुषा येषां स्नेहोऽभिन्नमुखरागः ।
अनुदिवसवर्द्धमान ऋणमिव पुत्रेषु संक्रामति ॥ )

स्पर्शति सज्जनस्य दुष्टस्पर्शनस्य का कथा धर्मसाधनस्पर्शने तापयति इति सज्जनस्य समभिव्यज्यते । नवनीतकल्पधीजितकार्थे । यथा निर्धूप नरोपि दर्शयति इति तात्पर्यम् ।

पापस्य पानकुट्या हुतवहो ज्वलति यद्यपि ।
न हि स परिहर्तव्या विषमदशासंस्थिता पुरुषा ॥५४॥

पानकुट्यां मद्यपस्थाने (सौण्डिककुट्याम्) ज्वलितो वह्निर्यस्तु स्थानेऽपि ज्वलति । परित्यक्तव्यो न स्यात् गुणत्वं परिहृत्य सम व्यवहरणीयमर्थे । अत्र—विषमदशासंस्थिता स्वस्य अभावेऽपि दशाम् प्राप्ता पुरुषा यथावस्था न परिहर्तव्याः । अत्र दुर्जनदृष्टान्तेन यदि यत्र क्वचित् आत्मगतत्व न दृश्यते कथमपि पुरुषेण आरोपकारणेन महापुरुषाय वैषम्य परिहृत्य सर्वोपायेन हितसाधन कर्तव्यमिति व्यज्यते । पानकुटी मद्यशालाकुटी इति महाराष्ट्रीय ।

स्खलित प्रभा प्रियाया माला भाति सभा समर्थस्य ।
भणित च जानन् किन्तु मौनं चाऽजानतो नूनम् ॥५५॥

प्रभा समर्थस्य स्वामिन ... भाति(शोभते) न तु यस्य कस्यचित् । प्रियाया प्रीतिपात्रस्य माल (प्रथमकोष) भाति म

---

पाणउडीय वि अलिउण हुअवहो जलइ जण्णवाडम्मि ।
ण हु त परिहरिअव्वा विसमदसासंठिआ पुरिसा ॥ ५४ ॥

पानकुट्यामपि ज्वलितो हुतवहो ज्वलति यज्ञवाटेऽपि ।
न खलु ते परिहर्तव्या विषमदशासंस्थिता पुरुषा ॥)

तु अप्रियाया अमनोनीताया । समर्थस्य क्षमा भाति न तु असमर्थस्य । जानतः विज्ञस्य भणितं भाषणं भाति, अजानतः ( अज्ञस्य ) च मौनं भातीत्यर्थः ।

अर्जितविभवानामपि खल एव हि भाजनं खलानां स्यात् ।
निम्बफलानि विपक्वान्यपि काकैरेव खाद्यन्ते ॥ ५६ ॥

